# ॥ ભગવત્સ્તુતી બ્રહ્મવૈવર્તપુરાણે ॥

.. Bhagavatstuti from brahmavaivartapurANa ..

sanskritdocuments.org

August 20, 2017

# .. Bhagavatstuti from brahmavaivartapurANa ..

# ॥ ભગવત્સ્તુતી બ્રહ્મવૈવર્તપુરાણે ॥

## Sanskrit Document Information


Text title : bhagavatstuti brahmavaivartapurANe

File name : bhagavatstutiBVP.itx

Category : purana, stotra

Location : doc_z_misc_general

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com

Description-comments : brahmavaivartapurANa brahmakhaNDam adhyAya 30

Latest update : January 27, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


August 20, 2017

*sanskritdocuments.org*

# ॥ ભગવત્સ્તુતી બ્રહ્મવૈવર્તપુરાણે ॥

અથ ત્રિંશોઽધ્યયઃ ।
શ્રીનારાયણ ઉવાચ ।

લમ્બોદરો હરિરૂમાપતિરાદિશેષબ્રહ્માદયઃ સુરગણા મનવો મુનીન્દ્રાઃ ।
વાણીશિવાત્રિપથગાકમલાદિકાશ્ચ સંચિન્તયેભ્દગવતશ્ચરણારવિન્દમ્ ॥ ૧॥

સન્સારસાગરમતીવ ગભીરઘોરં દાવાગ્નિસર્પપરિવેષ્ટિતેચેષ્ટિતાઙ્ગમ્ ।
સંલઙ્ઘ્ય ગન્તુમભિવાઞ્છતિ યો હિ દાસ્યં સંચિન્તયેદ્ભગવતશ્ચરણારવિન્દમ્ ॥ ૨॥

ગોવર્ધનોદ્ધરણકીર્તિરતીવખિન્ના ભૂર્ધારિતા ચ દશનાગ્રત એવ ચાઽઽદ્રા ।
વિશ્વાનિ લોમવિવરેષુ બિભર્તુરાદેઃ સંચિન્ત્યેદ્ભગવતશ્ચરણારવિન્દમ્ ॥ ૩॥

વેદાઙ્ગવેદમુખનિઃસૃત્કીર્તિરંશૈર્વેદાઙ્ગ્વેદજનકસ્ય હરેર્વિધાતુઃ ।
જન્માન્તકાદિભયશોકવિદીર્ણદેહ્ઃ સંચિન્ત્યેદ્ભગવતશ્ચરણારવિન્દમ્ ॥ ૪॥

ગોપાઙ્ગનાવદનપઙ્જષટ્પદસ્ય રાસેશ્વરસ્ય રસિકારમણસ્ય પુંસ્ઃ ।
વૃન્દાવને વિહરતો વ્રજ્વેષવિષ્ણોઃ સંચિન્ત્યેદ્ભગવતશ્ચરણારવિન્દમ્ ॥ ૫॥

ચક્ષુર્નિમેષપતિતો જગતાં વિધાતા તત્કર્મ વત્સ કથિતું ભુવિ કઃ સમર્થઃ ।
ત્વં ચાપિ નારદમુને પરમાદરેણ સઞ્ચિન્તનં કુરુ હરેશ્ચરણારવિન્દમ્ ॥ ૬॥

યૂયં વયં તસ્ય કલાકલાંશાઃ કલાકલાંશાઃ મનવો મુનીન્દ્રાઃ ।
કલાવિશેષા ભવપાદ્મમુખ્યા મહાન્વિરાઙ્ યસ્ય કલાવિશેષઃ ॥ ૭॥

સહશ્રશીર્ષા શિરસઃ પ્રદેશે બિભર્તિ સિધાર્થસમં ચ વિશ્વમ્ ।
કૂર્મે ચ શેષો મશ્કો ગજે યથા કૂર્મશ્ચ કૃષ્ણસ્ય કલાકલાંશઃ ॥ ૮॥

ગોલોકનાથસ્ય વિભોર્યશોઽમલં શ્રુતૌ પુરાણે નહિ કિંચન સ્ફુટમ્ ।
ન પાદ્મમુખ્યાઃ કથિતું સમર્થાઃ સર્વેશ્વરં તં ભજ પાદ્મપુત્ર ॥ ૯॥

વિશ્વેષુ સર્વેષુ ચ વિશ્વધામ્નઃ સન્ત્યેવ શશ્વદ્વિધિવિષ્ણુરુદ્રાઃ ।
તેષાં ચ સંખ્યાઃ શ્રુતયશ્ચ દેવાઃ પરં ન જાનન્તિ તમીશ્વરં ભજ ॥ ૧૦॥

કરોતિ સૃષ્ટિં સ વિધેર્વિધાતા વિધાય નિત્યાં પ્રકૃતિં જગત્પ્રસૂમ્ ।
બ્રહ્માદયઃ પ્રાકૃતિકાશ્ચ સર્વે ભક્તિપ્રદાં શ્રીં પ્રકૃતિં ભજન્તિ ॥ ૧૧॥

બ્રહ્મસ્વરુપા પ્રકૃતિર્ન ભિન્ના યયા ચ સૃષ્ટિં કુરુતે સનાતનઃ ।

સ્ત્રિયશ્ચ સર્વાઃ કલયા જગત્સુ માયા ચ સર્વે ચ તયા વિમોહિતાઃ ॥ ૧૨॥

નારાયણી સા પરમા સનાતની શક્તિશ્ચ પુંસઃ પરમાત્મનશ્ચ ।
આત્મેશ્વરશ્ચાપિ યયા ચ શક્તિમાંસ્તયા વિના સ્રષ્ટુમશક્ત એવ ॥ ૧૩॥

ગત્વા વિવાહં કુરુ વત્સ સાંપ્રતં કર્તું પ્રયુક્તશ્ચ પિતુર્નિર્દેશઃ ।
ગુરોર્નિર્દેશપ્રતિપાલકો ભવેઃ સર્વત્ર પૂજ્યો વિજયી ચ સંતતમ્ ॥ ૧૪॥

સ્વપત્નીં પૂજયેદ્યો હિ વસ્ત્રાલંકારચન્દનૈઃ ।
પ્રકૃતિસતસ્ય સંતુષ્ટા યથા કૃષ્ણો દ્વિજાર્ચને ॥ ૧૫॥

સા ચ યોષિત્સ્વરુપા ચ પ્રતિવિશ્વેષુ માયયા ।
યોષિતામપમાનેન પરાભૂતા ચ સા ભવેત્ ॥ ૧૬॥

દિવ્યા સ્ત્રી પૂજિતા યેન પતિપુત્રવતી સતી ।
પ્રકૃતિઃ પૂજિતા તેન સર્વમઙ્ગલદાયિની ॥ ૧૭॥

મૂલપ્રકૃતિરેકા સા પૂર્ણબ્રહ્માસ્વરુપિણી ।
સૃષ્ટૌ પઞ્ચવિધા સા ચ વિષ્ણુમાયા સનાતની ॥ ૧૮॥

પ્રાણાધિષ્ઠાતૃદેવી યા કૃષ્ણસ્ય પરમાત્મનઃ ।
સર્વાસાં પ્રેયસી કાન્તા સા રાધા પરિકીરિતા ॥ ૧૯॥

નારાયણપ્રિયા લક્ષ્મીઃ સર્વસમ્પત્સ્વરુપિણી ।
વાગધિષ્ઠાતૃદેવી યા સા ચ પૂજ્યા સરસ્વતી ॥ ૨૦॥

સાવિત્રી વેદમાતા ચ પૂજ્યરૂપા વિધેઃ પ્રિયા ।
શંકરસ્ય પ્રિયા દુર્ગા યસ્યાઃ પુત્રો ગણેશ્વરઃ ॥ ૨૧॥

ઇતિ શ્રીબ્રહ્મ્વૈવર્તે મહાપુરાણે બ્રહ્મ્ખણ્ડે સૌતિશૌનકસંવાદે
ભગવત્સ્તુતિતત્સ્વરુપમાય઼ાસ્વરૂપવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૩૦॥

brahmavaivartapurANa brahmakhaNDam adhyAya 30

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

.. Bhagavatstuti from brahmavaivartapurANa ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*